**मुख्यवार्ता:**

- प्रशासनेन अद्य डीज़ल-विमानयान-टर्बाइन्-इन्धनयोः (ए. टी. एफ़.) इत्यस्य उपरि निर्यातशुल्कं आरोपितम्।
- प्रधानमन्त्री नरेन्द्र मोदी आभासीय-माध्यमेन सर्वेषां राज्यानां मुख्यमन्त्रिभिः सह उपवेशनं कुर्वन अस्ति, यस्मिन् पश्चिम-एशिया द्वन्द्वस्य सन्दर्भे तेषां सज्जता योजनाः च समीक्षितुं शक्यन्ते।
- रक्षामन्त्रालयेन अद्य तुङ्गुस्का-वायु-रक्षा-प्रक्षेपण-व्यवस्थायाः तथा पी-8-आई दीर्घपरिधि-समुद्रीय-निरीक्षण-विमानस्य कृते अष्टपञ्चाशत्-अधिक-अष्टशत-कोटि-रूप्यकाणां मूल्यस्य अनुबन्धेषु हस्ताक्षराणि कृतानि।
- राष्ट्रियस्वतन्त्रपार्टीति दलस्य बालेन्द्रशाहः अद्य नेपालस्य प्रधानमन्त्री रूपेण शपथ ग्रहणं स्वीकृतवान्।
- अप्रैल-मासस्य षट्दिनाङ्क-पर्यन्तं इरानस्य ऊर्जा-आधारित-संरचनायाः उपरि आक्रमण-विरामस्य विषये चिन्तासु गल्फ्-को-आपरेशन्-कौन्सिल इति संस्था अमेरिका-इरान्-देशयोः मध्ये वार्तायां भूमिकां इच्छति।

**सरकार-ईंधन**

प्रशासनेन अद्य डीज़ल-विमानयान- टर्बाइन्-इन्धनयोः (ए. टी. एफ़.) इत्यस्य उपरि निर्यातशुल्कं आरोपितम्, पेट्रोल्-डीज़ल् इत्येतयोः उपरि आन्तरिकशुल्कं च न्यूनीकृतम्, येन पर्याप्त-उपलब्धता सुनिश्चितं भवेत् तथा च पश्चिम-एशिया-सङ्कटेन वर्धमानात् वैश्विक-तैल-मूल्यात् उपभोक्तृणां रक्षणं भवेत्। पश्चिम-एशियायाः वर्तमान-विकासस्य विषये अन्तामन्त्रालयीयं विवरणं सम्बोधयन्, केन्द्रीय-अप्रत्यक्ष-कर-सीमाशुल्क-मण्डलस्य अध्यक्षः विवेक-चतुर्वेदी इत्येषः अवदत् यत्, यदा अन्ताराष्ट्रिय-मूल्यानि तीव्ररूपेण वर्धितानि सन्ति, तदा निर्यातं निरुत्साहनाय अस्य कार्यस्य उद्देश्यं वर्तते, येन शोधकानां कृते विदेशेषु इन्धनं विक्रयणार्थं प्रोत्साहनं कल्प्यते। डीज़ल्-इन्धनयोः निर्यातशुल्कं सार्द्धैकविंशति रूप्यकाणि, ए टी एफ्-इन्धनस्य निर्यातशुल्कं सार्ध ऊनत्रिंशत् रूप्यकाणि च निर्धारितानि।

पेट्रोलियम-प्राकृतिकगैस-मन्त्रालयस्य संयुक्तसचिवः सुजाता शर्मा इत्येषा उक्तवती यत्, भारते वर्तमानकाले पर्याप्तानि अशोधितानि तैलानि सन्ति, अग्रिम-मासद्वयोः आपूर्तिः सुरक्षिता अस्ति, तथा च एल्. पि. जि. तथा पी. एन्. जि. इत्येतयोः उपलब्धताऽपि अस्ति इति। सा अग्रे अवोचत् यत् शोधनागाराणि पूर्णक्षमतया अधिकक्षमतया वा कार्यं कुर्वन्ति, देशीय-एल्. पि. जि. उत्पादनं प्रायः चत्वारिंशत् प्रतिशतं यावत् वर्धितम् अस्ति।

**प्रधानमंत्री-सभा**

प्रधानमन्त्री नरेन्द्र मोदी आभासीय-माध्यमेन सर्वेषां राज्यानां मुख्यमन्त्रिभिः सह उपवेशनं कुर्वन अस्ति, यस्मिन् पश्चिम-एशिया द्वन्द्वस्य सन्दर्भे तेषां सज्जता योजनाः च समीक्षितुं शक्यन्ते। अस्य संवादस्य मुख्योद्देश्यं 'टीम्-इण्डिया' इति भावेन संयुक्तरूपेण कार्यं सुनिश्चितं करणीयम् अस्ति। परन्तु, येषु राज्येषु 'आचारसंहिता' प्रवर्तितास्ति तेषां मुख्यमन्त्रिणः अस्यां सभायां सहभागिनः नैव भविष्यन्ति।

**रक्षामन्त्रालयः**

रक्षामन्त्रालयेन अद्य तुङ्गुस्का-वायु-रक्षा-प्रक्षेपण-व्यवस्थायाः तथा पी-8-आई दीर्घपरिधि-समुद्रीय-निरीक्षण-विमानस्य कृते अष्टपञ्चाशत्-अधिक-अष्टशत-कोटि-रूप्यकाणां मूल्यस्य अनुबन्धेषु हस्ताक्षराणि कृतानि। मन्त्रालयेन उक्तं यत् पञ्चचत्वारिंशत्-अधिक-चतुःशत-कोटि-रूप्यकाणां मूल्यस्य तुङ्गुस्का-वायु-रक्षा-प्रक्षेपणयन्त्र-व्यवस्थायाः क्रयणार्थं अनुबन्धः रूसदेशस्य जे.एस्.सी. रोसोबोरोनएक्सपोर्ट इत्यनेन सह रक्षासचिवस्य राजेशकुमारसिंहस्य उपस्थितौ हस्ताक्षरितः। एताः अत्याधुनिक-प्रक्षेपण्यः विमान-ड्रोन्, क्रूज़-प्रक्षेपण इत्यादीनां ड्रॉन-यंत्राणां प्रतिकारार्थं देशस्य बहुस्तरीय-वायु-रक्षा-क्षमतां अधिकं सुदृढं करिष्यन्ति। मन्त्रालयेन उक्तं यत् एषा सन्धिः भारत-रशिया-सामरिक-रक्षा-सहभागित्वं अधिकं सुदृढं करिष्यति।

**निर्मला-सीतारामन**

केन्द्रीय-वित्तमन्त्री निर्मला सीतारामनः अवदत् यत् पेट्रोल, डीज़ल तथा एवियेशन-टर्बाइन-फ्यूल (ए.टी.एफ.) इत्येतयोः मूल्येषु वृद्धिः न भवेत् इति सर्वकारः सुनिश्चितं करोति। नवदेहली-नगरे प्रसारमाध्यमैः सह वार्तालापं कुर्वती श्रीमती सीतारामनः अवदत् यत् पश्चिम-एशियायाः वर्तमान-संघर्ष-स्थितिं दृष्ट्वा प्रधानमन्त्रिणा नरेन्द्रमोदिना एकं उपवेशनं आयोजितम्। तस्मिन् सम्मेलने निर्णयः कृतः यत् डीज़ल तथा ए.टी.एफ. इत्येतयोः अभावः न भवेत्, तथा च वैश्विक-स्थितेः प्रभावात् तेषां मूल्यानि अपि न वर्धन्ताम् इति।

**बालेन्द्रशाहः- नेपाल प्रधानमन्त्री**

राष्ट्रियस्वतन्त्रपार्टीति दलस्य संसदीयदलस्य नेता बालेन्द्रशाहः अद्य नेपालस्य लोकतान्त्रिकरूपेण निर्वाचितः प्रधानमन्त्री रूपेण शपथ ग्रहणं स्वीकृतवान्। देशस्य कनिष्ठतमः प्रधानमन्त्री जातः पञ्चत्रिंशत् वर्षीयः आर्. एस्. पी. इति दलस्य नेता शीतल निवास-नगरस्य राष्ट्रपति-कार्यालये राष्ट्रपतिना रामचन्द्रपौडेल् इत्यनेन द्वारा पदस्य गोपनीयतायाः च शपथं स्वीकृतवान्। इतः प्राक्, सद्यैव समाप्ते संसदीयनिर्वाचने बहुमतेन व्यापकं विजयं प्राप्य आर्. एस्. पि. दलेन श्रीशाहं संसदीयदलस्य नेतृत्वेन निर्वाचितं, येन सः देशस्य सप्त चत्वारिंशत्तमः प्रधानमन्त्री अभवत्। भ्रष्टाचारस्य, परिवारवादस्य, सामाजिक-अन्तर्जाल-प्रतिबन्धस्य च विरुद्धं यूनां नेतृत्वे जेन-जी-इत्यस्य विरोधस्य अनन्तरं, पूर्वप्रधानमन्त्रिणः के. पी. शर्मा-ओली-वर्यस्य नेतृत्वे संयुक्त-सर्वकारः गतवर्षे सितम्बर-मासे निष्कासितः, ततः परं, श्रीशाहः प्रथमः लोकतान्त्रिकरूपेण निर्वाचितः प्रधानमन्त्री अस्ति यः शपथं स्वीकृतवान्।

**ईरान-अमरीका**

अप्रैल-मासस्य षट्दिनाङ्क-पर्यन्तं इरानस्य ऊर्जा-आधारित-संरचनायाः उपरि आक्रमण-विरामस्य विषये चिन्तासु गल्फ्-को-आपरेशन्-कौन्सिल इति संस्था अमेरिका-इरान्-देशयोः मध्ये वार्तायां भूमिकां इच्छति।

**मुख्यन्यायाधीशः- लेह यात्रा**

भारतस्य मुख्यन्यायाधीशः डा. सूर्यकान्तः अद्य लद्दाख्-केन्द्रशासितप्रदेशस्य चतुर्दिवसीय-यात्रायां लेह-नगरं सम्प्राप्तवान्। लेह्-नगरस्य खुशुक-बकुला-रिनपोचे-विमानस्थानके लद्दाखी-पारम्परिक-रीत्या भव्यं स्वागतम् अभवत्, लद्दाख्-यात्रायाः आरम्भे सः गार्ड-आफ़्-आनर् अपि स्वीकृतवान्। भ्रमणकाले श्रीकान्तः लेह्-कार्गिल्-नगरयोः नवनिर्मितानां मण्डल-न्यायालय-भवनानां उद्घाटनं करिष्यति, येन केन्द्र-शासित-प्रदेशे न्यायिक-आधारभूत-संरचनायाः महती वृद्धिः भविष्यति।

**महिला सुरक्षा**

सर्वकारः अवदत् यत् दुर्दशायां स्थितानां महिलानां साहाय्यार्थं सम्पूर्णे देशे षड्विंशत्-अधिक-नवशत-वन-स्टॉप-केन्द्राणि कार्यरतानि सन्ति। अद्य लोकसभायां एकस्य प्रश्नस्य प्रत्युत्तरे महिला-बालविकास-राज्यमन्त्री सावित्री ठाकुरः उक्तवती यत् एतेषु केन्द्रेषु त्रयोदश-लक्षतः अधिकाः महिलाः सहायिकाः सन्ति। मन्त्रिणा उक्तं यत् सर्वकारः महिलानां सुरक्षां सुनिश्चितं कर्तुं सर्वोच्च-प्राथमिकतां ददाति। ओ.एस.सी. (वन-स्टॉप-केन्द्राणि) इत्येतेषु विविधाः समन्वित-सेवाः प्रदीयन्ते, यथा- चिकित्सा-साहाय्यं, विधि-साहाय्यं, अस्थायी-आवासः, आरक्षक-साहाय्यं, मनोसामाजिक-परामर्शः च।

**वित्त-विधेयकं**

राज्यसभायां षड्विंशत्यधिक-द्विसहस्रतमवर्षस्य वित्त विधेयकमादायविचारार्थं लोकसभायै प्रत्यावर्तनार्थं च स्वीकृतम्। एतत् विधेयकं षड्विंशत्यधिक-द्विसहस्रतम-वर्षतः सप्तविंशत्यधिक-द्विसहस्रतम-वित्तवर्षस्य कृते केन्द्रसर्वकारस्य वित्तीय-प्रस्तावान् कार्यान्वितुं प्रयुज्यते। लोकसभायां वित्तराज्यमन्त्री पङ्कजचौधरी इत्यनेन एतत् विधेयकं पुरःस्थापितम्।

**।। ति वार्ताः ।।**